# Mantratmaka Shlokas

# મન્ત્રાત્મકશ્લોકાઃ

## Document Information

Text title : Mantratmaka Shlokas

File name : mantrAtmakashlokAH.itx

Category : dattatreya, deities_misc, vAsudevAnanda-sarasvatI, mantra

Location : doc_deities_misc

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# મન્ત્રાત્મકશ્લોકાઃ

અનસૂયાત્રિસમ્ભૂતો દત્તાત્રેયો દિગમ્બરઃ ।
સ્મર્તૃગામી સ્વભક્તાનામુદ્ધર્તા ભવ સઙ્કટાત્ ॥ ૧॥

દરિદ્રવિપ્રગેહે યઃ શાકં ભુક્ત્વોત્તમશ્રિયમ્ ।
દદૌ શ્રીદત્તદેવઃ સ દારિદ્ર્યાચ્છ્રીપ્રદોઽવતુ ॥ ૨॥

દૂરીકૃત્ય પિશાચાર્તિં જીવયિત્વા મૃતં સુતમ્ ।
યોઽભૂદભીષ્ટદઃ પાતુ સ નઃ સન્તાનવૃદ્ધિકૃત્ ॥ ૩॥

જીવયામાસ ભર્તારં મૃતં સત્યા હિ મૃત્યુહા ।
મૃત્યુઞ્જયઃ સ યોગીન્દ્રઃ સૌભાગ્યં મે પ્રયચ્છતુ ॥ ૪॥

અત્રેરાત્મપ્રદાનેન યો મુક્તો ભગવાનૃણાત્ ।
દત્તાત્રેયં તમીશાનં નમામિ ઋણમુક્તયે ॥ ૫॥

જપેચ્છ્લોકમિમં દેવપિત્રર્ષિપુન્નૃણાપહમ્ ।
સોઽનૃણો દત્તકૃપયા પરમ્બ્રહ્માધિગચ્છતિ ॥ ૬॥

અત્રિપુત્રો મહાતેજો દત્તાત્રેયો મહામુનિઃ ।
તસ્ય સ્મરણમાત્રેણ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૭॥

નમસ્તે ભગવન્દેવ દત્તાત્રેય જગત્પ્રભો ।
સર્વબાધાપ્રશમનં કુરુ શાન્તિં પ્રયચ્છ મે ॥ ૮॥

અનસૂયાસુત શ્રીશ જનપાતકનાશન ।
દિગમ્બરં નમો નિત્યં તુભ્યં મે વરદો ભવ ॥ ૯॥

શ્રીવિષ્ણોરવતારોઽયં દત્તાત્રેયો દિગમ્બરઃ ।
માલાકમણ્ડલૂચ્છૂલડમરૂશઙ્ખચક્રધૃક્ ॥ ૧૦॥

નમસ્તે શારદે દેવિ સરસ્વતિ મતિપ્રદે ।
વસ ત્વં મમ જિહ્વાગ્રે સર્વવિદ્યાપ્રદા ભવ ॥ ૧૧॥

દત્તાત્રેયં પ્રપદ્યે શરણમનુદિનં દીનબન્ધું મુકુન્દમ્ ॥

નૈર્ગુણ્યં સન્નિવિષ્ટં પથિ પરમપદં બોધયન્તં મુનીનામ્ ॥

ભસ્માભ્યઙ્ગં જટાભિઃ સુલલિતમુકુટં દિક્પટં દિવ્યરૂપં
સહ્યાદ્રૌ નિત્યવાસં પ્રમુદિતમમલં સદ્ગુરું ચારુશીલમ્ ॥ ૧૨॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતાઃ મન્ત્રશ્લોકાઃ સમ્પૂર્ણાઃ ।

*Mantratmaka Shlokas*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*